# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (त्रयोदश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥श्रीदुर्गासप्तशती ॥

॥ अथ त्रयोदशोऽध्यायः ॥

। ध्यानम् ।

ॐ बालार्कमण्डलाभासां(ञ्), चतुर्बाहुं(न्) त्रिलोचनाम् ।

पाशाङ्कुशवराभीतिर्- धारयन्तीं(म्) शिवां(म्) भजे ॥

ॐ ऋषिरुवाच ॥ 1॥

एतत्ते कथितं(म्) भूप, देवीमाहात्म्यमुत्तमम् ।

एवं(म्)प्रभावा सा देवी, ययेदं(न्) धार्यते जगत् ॥ 2॥

विद्या तथैव क्रियते, भगवद्विष्णुमायया ।

तया त्वमेष वैश्यश्च, तथैवान्ये विवेकिनः ॥ 3॥

मोह्यन्ते मोहिताश्चैव, मोहमेष्यन्ति चापरे ।

तामुपैहि महाराज, शरणं(म्) परमेश्वरीम् ॥ 4॥

आराधिता सैव नृणां(म्), भोगस्वर्गापवर्गदा ॥ 5॥

मार्कण्डेय उवाच ॥ 6॥

इति तस्य वचः(श्) श्रुत्वा, सुरथः(स्) स नराधिपः ॥ 7॥

प्रणिपत्य महाभागं(न्), तमृषिं(म्) शंसितव्रतम् ।
निर्विण्णोऽतिममत्वेन, राज्यापहरणेन च ॥ 8॥

जगाम सद्यस्तपसे, स च वैश्यो महामुने ।
सन्दर्शनार्थमम्बाया, नदीपुलिनसंस्थितः ॥ 9॥

स च वैश्यस्तपस्तेपे, देवीसूक्तं(म्) परं(ञ्) जपन् ।
तौ तस्मिन् पुलिने देव्याः(ख्), कृत्वा मूर्तिं(म्) महीमयीम् ॥ 10॥

अर्हणां(ञ्) चक्रतुस्तस्याः(फ्), पुष्पधूपाग्नितर्पणैः ।
निराहारौ यताहारौ, तन्मनस्कौ समाहितौ ॥ 11॥

ददतुस्तौ बलिं(ञ्) चैव, निजगात्रासृगुक्षितम् ।
एवं(म्) समाराधयतोस्- त्रिभिर्वर्षैर्यतात्मनोः ॥ 12॥

परितुष्टा जगद्धात्री, प्रत्यक्षं(म्) प्राह चण्डिका ॥ 13॥

देव्युवाच ॥ 14॥

यत्प्रार्थ्यते त्वया भूप, त्वया च कुलनन्दन ।

मत्तस्तत्प्राप्यतां(म्) सर्वं(म्), परितुष्टा ददामि तत् ॥ 15॥

मार्कण्डेय उवाच ॥ 16॥

ततो वव्रे नृपो राज्य- मविभ्रं(म्)श्यन्यजन्मनि ।

अत्रैव च निजं(म्) राज्यं(म्), हतशत्रुबलं(म्) बलात् ॥ 17॥

सोऽपि वैश्यस्ततो ज्ञानं(वँ), वव्रे निर्विण्णमानसः ।

ममेत्यहमिति प्राज्ञः(स्), सङ्गविच्युतिकारकम् ॥ 18॥

देव्युवाच ॥ 19॥

स्वल्पैरहोभिर्नृपते, स्वं(म्) राज्यं(म्) प्राप्स्यते भवान् ॥ 20॥

हत्वा रिपूनस्खलितं(न्), तव तत्र भविष्यति ॥ 21॥

मृतश्च भूयः(स्) सम्प्राप्य, जन्म देवाद्विवस्वतः ॥ 22॥

सावर्णिको नाम मनुर्-भवान् भुवि भविष्यति ॥ 23॥

वैश्यवर्य त्वया यश्च, वरोऽस्मत्तोऽभिवाञ्छितः ॥ 24॥

तं(म्) प्रयच्छामि सं(म्)सिद्ध्यै, तव ज्ञानं(म्) भविष्यति ॥ 25॥
मार्कण्डेय उवाच ॥ 26॥

इति दत्त्वा तयोर्देवी, यथाभिलषितं(वँ) वरम् ॥ 27॥

बभूवान्तर्हिता सद्यो, भक्त्या ताभ्यामभिष्टुता ।
एवं(न्) देव्या वरं(लँ) लब्ध्वा, सुरथः क्षत्रियर्षभः ॥ 28॥

सूर्याज्जन्म समासाद्य, सावर्णिर्भविता मनुः ॥ 29॥

एवं(न्) देव्या वरं(लँ) लब्ध्वा, सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य, सावर्णिर्भविता मनुः ॥ क्लीं ॐ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
सुरथवैश्ययोर्वरप्रदानं(न्) नाम त्रयोदशोऽध्यायः ॥

उवाच 6, अर्धश्लोकाः 11, श्लोकाः 12, एवम् 29 एवमादितः 700

समस्ता उवाचमन्त्राः 57, अर्धश्लोकाः 42, श्लोकाः 535, अवदानानि 66 ॥

॥ श्रीसप्तशतीदेवीमाहात्म्यं समाप्तम् ॥
॥ ॐ तत् सत् ॐ ॥